STOTRADHWANI

## 96 - षण्णवतितम दशकम्
## भगवद् विभूतयः ज्ञान कर्म भक्ति योगाः च

त्वं हि ब्रह्मैव साक्षात् परं उरु महिमन् अक्षराणा मकारः
तारो मन्त्रेषु राज्ञां मनुरसि मुनिषु त्वं भृगुर् नारदोऽपि ।
प्रह्लादो दानवानां पशुषु च सुरभिः पक्षिणां वैनतेयः
नागाना मस्य नन्तः सुर सरिदपि च स्रोतसां विश्व मूर्ते ॥ ॥96-1॥

ब्रह्मण्यानां बलिस् त्वं क्रतुषु च जप यज्ञोऽसि वीरेषु पार्थः
भक्ताना मुद्धवस् त्वं बलमसि बलिनां धाम तेजस्विनां त्वम् ।
नास्त्यन्तस् त्वद् विभूतें विकस दतिशयं वस्तु सर्वं त्वमेव
त्वं जीवस् त्वं प्रधानं यदिह भवद्दते तन्न किञ्चित् प्रपञ्चे ॥ ॥96-2॥

धर्मं वर्णाश्रमाणां श्रुति पथ विहितं त्वत् परत्वेन भक्त्या
कुर्वन्तोऽन्तर् विरागे विकसति शनकैस् सन्त्यजन्तो लभन्ते ।
सत्ता स्फर्ति प्रियत्वा आत्मकं मखिल पदार्थेषु भिन्नेष्वभिन्नं
निर्मूलं विश्व मूलं परम महमिति त्वद् विबोधं विशुद्धम् ॥ ॥96-3॥

ज्ञानं कर्मापि भक्तिः त्रितय मिह भवत् प्रापकं तत्र तावत्
निर्विण्णाना मशेषे विषय इह भवेत् ज्ञानयोगेऽधिकारः ।
सक्तानां कर्मयोगः त्वयि हि विनिहितः ये तु नात्यन्त सक्ताः
नाप्यत्यन्तं विरक्ताः त्वयि च धृतरसाः भक्तियोगो ह्यमीषाम् ॥ ॥96-4॥

ज्ञानं त्वत् भक्ततां वा लघु सुकृत वशात् मर्त्य लोके लभन्ते
तस्मात् तत्रैव जन्म स्पृहयति भगवन् नाकगो नारको वा ।
आविष्टं मां तु दैवात् भव जल निधि पोतायिते मर्त्य देहे
त्वं कृत्वा कर्णधारं गुरु मनुगुण वातायितस् तारयेथाः ॥ ॥96-5॥

अव्यक्तं मार्गयन्त: श्रुतिभि रपि नयै: केवल ज्ञान लुब्धा:
क्लिश्यन्तेऽतीव सिद्धिं बहुतर जनुषाम् अन्त एवाप्नुवन्ति ।
दूरस्थ: कर्म योगोऽपि च परमफले नन्वयं भक्ति योगस्तु
आमूलादेव हृद्य: त्वरितमयि भवत् प्रापको वर्धतां मे ॥ ॥96-6॥
ज्ञानायैवाति यत्नं मुनि रप वदते ब्रह्म तत्त्वं तु शृण्वन्
गाढं त्वत् पाद भक्तिं शरण मयति य: तस्य मुक्ति: कराग्रे ।
त्वत् ध्यानेऽपीह तुल्यापुनरसुकरता चित्त चाञ्चल्य हेतो:
अभ्यासा दाशु शक्यं तदपि वशयितुं त्वत्कृपा चारु ताभ्याम् ॥96-7॥

निर्विण्ण: कर्म मार्गे खलु विषमतमे त्वत्कथादौ च गाढं
जात श्रद्धोऽपि कामान् अयि भुवन पत: नैव शक्नोमि हातुम् ।
तत् भूयो निश्चयेन त्वयि निहित मना: दोष बुद्ध्या भजंस् तान्
पुष्णीयां भक्ति मेव त्वयि हृदयगते मङ्क्षु नङ्क्ष्यन्ति सङ्गा: ॥96-8॥

कश्चित् क्लेशार्जितार्थ क्षय विमल मति: नुद्यमानो जनौघै:
प्रागेवं प्राह विप्र: न खलु मम जन: काल कर्म ग्रहा वा।
चेतो मे दु:ख हेतुस् तदिह गुण गणं भावयत् सर्वकारि
इत्युक्त्वा शान्तो गतस्त्वां मम च कुरु विभो तादृशी चित्त शान्तिम् ॥96-9॥

ऐल: प्रा-गुर्वशीं प्रति अति विवशमना: सेवमानश् चिरं तां
गाढं निर्विद्य भूयो युवति सुख मिदं क्षुद्र मेवेति गायन् ।
त्वत् भक्तिं प्राप्य पूर्ण: सुख तर मचरत् तद्वदुद्धूत सङ्गं
भक्तोत्तंसं क्रिया मां पवन पुरपते हन्त मे रुन्धि रोगान् ॥ ॥96-10॥

॥ सदा सर्वत्र गोविन्द नाम संकीर्तनम् गोविन्दा....गोविन्दा ॥
॥ श्री गुरुवायूरप्पा शरणम् श्री हरये नम:॥